**B**

# Second Terminal Evaluation-2016

First Language Part I - Paper -I

**SANSKRIT**

(For Academic and Oriental Sanskrit Schools )

Class -X

Time - 1½ Hours | Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः । प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या।

**1. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।** 4x1=4

क) **"वेदान्तस्य धार्मिकता"** - इति ग्रन्थः केन विरचितम् ?
(डा. एस्.राधाकृष्णेन, बालगङ्गाधरतिलकेन, डा.एस्.रामचन्द्रेण)

ख) **"अक्ष्णोः समीपं"** इत्येतयोः समस्तपदं किम् ?
(समीक्ष्य, समक्षम्, सूक्ष्मम् )

ग) माघम् इति प्रसिद्धं काव्यम् ?
( शिशुपालवधम्, किरातार्जुनीयम्, कुमारसम्भवम् )

घ) येशुदेवस्य चरितं अधिकृत्य केरलीयमहाकविना विरचितं संस्कृतमहाकाव्यं किम् ?
(क्रिस्तुभागवतम्, नवभारतम्, केरलोदयम्)

**2. यथोचितं योजयत।** 4x1=4

क) निधिचालसुगमा - दुष्यन्तः।

ख) विद्वदौषधम् - शिशुपालः ।

ग) पुरुवंशराजः - कल्याणिरागः।

घ) चेदिराजः - नैषधम् ।


www.shenischool.in

**3. सर्वदमनम् अधिकृत्य सूचनानुसारं स्वभावनिरूपणं लिखत।** **1x4=4**

*सूचना-* दुष्यन्तपुत्रः ...... अभिज्ञानशाकुन्तलं नाटकं ...... चक्रवर्तिलक्षणयुक्तः ...... अबालसत्वः बालः ...... सिंहशिशुना सह क्रीडा ...... शकुन्तलावण्यम् ....... मातरं प्रति स्नेहः।

**4. अधोदत्तात् वाक्यात् क्त्वान्त- ल्यबन्त-तुमुन्नन्तरूपाणि विविच्य लिखत।** **1x3=3**

शिशुदिने छात्राः चित्राणि विलिख्य तेषु वर्णानि लेपनं कृत्वा प्रदर्शयितुं सन्नद्धाः अभवन्।

**5 प्रादेशिकभाषया लिखत।** **1x5=5**

केरलराज्ये बहुविधाः कलारूपाः सन्ति। कथाकेलिः, मोहिनियाट्टम्, कूटियाट्टम्, चाक्यार्कूत् इत्यादयः प्रसिद्धाः भवन्ति। एषु लास्यप्रधानं नृत्तरूपं भवति मोहिनियाट्टम्। अयं कलारूपः नाट्यशास्त्रनियमानुसारम् अवतार्यते। श्रृङ्गाररसप्रधानोऽयम् अस्वादकहृदयम् अत्यधिकम् आह्लादयति।

**6. खण्डिकां पठित्वा अधोदत्त प्रश्नानाम् उत्तराणि लिखत।** **5x1=5**

केरलीयः संस्कृतपण्डितः समूह्यपरिष्कर्ता च भवति पुन्नश्शेरी नीलकण्ठशर्मा। अयं पालक्काट् जिल्लायाः पट्टाम्बी जनपदे १८५८ तमे वर्षे जूण्मासस्य १७ दिने जनिम् अलभत। अस्य पितरौ नारायणशर्मा पाप्पिमनयम्मा च आस्ताम्। संस्कृतविद्याभ्यासप्रचारणाय 'सारस्वतोद्योतिनी' नाम संस्कृतपाठशालां स्थापितवान्। इदानीं पाठशालेयं पट्टाम्बी सर्वकारसंस्कृतकलालयः इति नाम्ना प्रवर्तते। विज्ञानचिन्तामणी नाम संस्कृतपत्रिकापि तेन प्रसिद्धीकृता।

क) सामूह्यपरिष्करणप्रवर्तनेषु निमग्नः केरलीयः संस्कृतपण्डितः कः आसीत् ?

ख) संस्कृतप्रचारणाय स्थापितायाः पाठशालायाः नाम किम् ?

ग) पुन्नश्शेरिशर्मणः पितरौ कौ ?

घ) '**जन्म**' इत्यर्थकं पदं खण्डिकातः चित्वा लिखत।

ङ) पुन्नश्शेरिशर्मणा प्रसिद्धीकृता संस्कृतपत्रिका का ?


www.shenischool.in

**7. सम्भाषणांशान् पूरयत।** **4x1=4**

जानकी - अये पार्वति! .............. कथमासीत् ?

पार्वती - सखि ! विनोदयात्रा अतीव हृद्या अभवत् ।

जानकी - ........................................ ?

पार्वती - यात्रासङ्घे ५० छात्राः दश अध्यापकाः च आसन् ।

जानकी - ........................................ ?

पार्वती - तिरुवनन्तपुरे नियमसभामन्दिरं कोवलं च गतवन्तः।

जानकी - ........................................ ?

पार्वती - वयम् अद्य प्रभाते प्रत्यागतवन्तः।

**8. सूचनानुसारं यदा -तदा उपयुज्य वाक्यं परिवर्तयत ।** **2x1=2**

उदा - भवान् भिक्षां ददाति। अन्यान् मा आह्वयतु ।

यदा भवान् भिक्षां ददाति तदा अन्यान् मा आह्वयतु ।

क) घोरातपः विद्यते। बहिः मा क्रीडतु ।

**9 . सूचनानुसारं जीवचरित्रं लिखत ।** **1x5=5**

नाम - डा. ए. पि. जे. अब्दुल्कलाम्

जन्मः - 1931 अक्तूबर् 15

पितरौ - जैनलुब्दीन् आष्यम्मा च ।

जन्मस्थानम् - तमिल्नाटु राज्ये रामेश्वरम्।

कर्ममण्डलम् - वैज्ञानिकः, प्रभाषकः, अध्यापकः च ।

प्रशस्तिः - भारतस्य राष्ट्रपतिः ।

कृतयः - ' विङ्स् ओफ् फयर् '।

पुरस्कारः - भारतरत्नं, पद्मभूषण्, पद्मविभूषण्

देहवियोगः - 2015 जूलै 27

**10 . उदाहरणानुसारं सन्धिच्छेदं लिखत।** **1x1=1**

उदा- यदि + एवम् - यद्येवम् ।

क) इत्येव - ........... + ........ ।



www.shenischool.in

11. उदाहरणानुसारम् एकपदं लिखत। 1x1=1

उदा- पार्वती - पर्वतस्य अपत्यं स्त्री ।

क) जानकी - ......................।

12. अधोदत्तश्लोकस्य सूचनानुसारं गद्यक्रमं लिखत। 1x2=2

क) एवं वादिनि देवर्षौ
पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि
गणयामास पार्वती ।।

सूचनाः - ........ एवं ........ पितुः ........ ....... ........ लीलाकमलपत्राणि ........ ।

*** *** ***

www.shenischool.in